अवतारत्रयस्तोत्रम्

मध्वहृत्कमलस्थितं वरदायकं करुणाकरं
लक्ष्मणाग्रजमक्षयं दुरितक्षयं कमलेक्षणम् ।
रावणान्तकमव्ययं वरजानकीरमणं विभुं
अञ्जनासुतपाणिकञ्जनिषेवितं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ १॥

देवकीतनयं निजार्जुनसारथिं गरुडध्वजं
पूतनाशकटासुरादिखलान्तकं पुरुषोत्तमम् ।
दुष्टकंसनिमर्दनं वररुग्मिणीपतिमच्युतं
भीमसेनकराम्बुजेन सुसेवितं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ २॥

ज्ञानमुक्तिसुभक्तिदं वरबादरायणमव्ययं
कोटिभास्करभासमानकिरीटकुण्डलमण्डितम् ।
वाक्सुदर्शनतः कलेः शिरघातकं रमया युतं
मध्वसत्करकञ्जपूजितमक्षयं प्रणमाम्यहम् ॥
पालयस्व निपालयस्व निपालयस्व रमापते
वादिराजमुनीन्द्रवन्दित वाजिवक्त्र नमोस्तु ते ॥ ३॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

अवतारत्रयस्तोत्रं सम्पूर्णम्

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु